0649CH09

नवमः पाठः

# क्रीडास्पर्धा

**हुमा** – यूयं कुत्र गच्छथ?

**इन्दरः** – वयं विद्यालयं गच्छामः।



**फेकनः** – तत्र क्रीडास्पर्धाः सन्ति। वयं खेलिष्यामः।

**रामचरणः** – किं स्पर्धाः केवलं बालकेभ्यः एव सन्ति?

**प्रसन्ना** – नहि, बालिकाः अपि खेलिष्यन्ति।

**रामचरणः** – किं यूयं सर्वे एकस्मिन् दले स्थ? अथवा पृथक्-पृथक् दले?

**प्रसन्ना** – तत्र बालिकाः बालकाः च मिलित्वा खेलिष्यन्ति।

**फेकनः** – आम्, बैडमिंटन-क्रीडायां मम सहभागिनी जूली अस्ति।

© NCERT not to be republished

**प्रसन्ना** – एतद् अतिरिक्तं कबड्डी, नियुद्धं, क्रिकेटं, पादकन्दुकं, हस्तकन्दुकं, चतुरङ्गः इत्यादयः स्पर्धाः भविष्यन्ति।



**इन्दरः** – हुमे! किं त्वं न क्रीडसि? तव भगिनी तु मम पक्षे क्रीडति।

**हुमा** – नहि, मह्यं चलचित्रं रोचते। परम् अत्र अहं दर्शकरूपेण स्थास्यामि।

**फेकनः** – अहो! पूरनः कुत्र अस्ति? किं सः कस्यामपि स्पर्धायां प्रतिभागी नास्ति?

**रामचरणः** – सः द्रष्टुं न शक्नोति। तस्मै अस्माकं विद्यालये पठनाय तु विशेषव्यवस्था वर्तते। परं क्रीडायै प्रबन्धः नास्ति।

**हुमा** – अयं कथमपि न न्यायसङ्गतः। पूरनः सक्षमः, परं प्रबन्धस्य अभावात् क्रीडितुं न शक्नोति।

**इन्दरः** – अस्माकं तादृशानि अनेकानि मित्राणि सन्ति। वस्तुतः तानि अन्यथासमर्थानि।

**फेकनः** – अतः वयं सर्वे प्राचार्यं मिलामः। तं कथयामः। शीघ्रमेव तेषां कृते व्यवस्था भविष्यति।

© NCERT not to be republished








## शब्दार्थाः

| | | | |
|---|---|---|---|
| स्पर्धाः | – | प्रतियोगिताएँ | competitions |
| यूयम् | – | तुम सब | you all |
| वयम् | – | हम सब | we all |
| खेलिष्यामः | – | खेलेंगे | shall play |
| मिलित्वा | – | मिलकर | together |
| नियुद्धम् | – | जूडो | judo |
| पादकन्दुकम् | – | फुटबाल | football |
| हस्तकन्दुकम् | – | वॉलीबाल | volleyball |
| चतुरङ्गः | – | चेस | chess |
| चलचित्रम् | – | सिनेमा | cinema |
| स्थास्यामि | – | रहूँगी/रहूँगा | shall stay |
| द्रष्टुम् | – | देखने के लिए | to see |
| न्यायसङ्गतः | – | उचित | lawful, proper |
| तादृशानि | – | वैसे | similar |
| अन्यथासमर्थानि | – | भिन्न तरीके से योग्य | differently able |

अन्यथासमर्थः–यह शब्द वस्तुतः अंग्रेज़ी के differently able का बोधक है। जो प्रायशः विकलांग के लिये प्रयोग में लाया जा रहा है।

© NCERT not to be republished



## अभ्यासः



**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् | आवाम् | अस्मान् |
| मम | आवयोः | अस्माकम् |
| त्वम् | युवाम् | यूयम् |
| त्वाम् | युवाम् | युष्मान् |
| तव | युवयोः | युष्माकम् |

**2. निर्देशानुसारं परिवर्तनं कुरुत-**

**यथा-** अहं क्रीडामि। - (बहुवचने) - **वयं क्रीडामः।**

(क) अहं नृत्यामि। - (बहुवचने) - ..............................

(ख) त्वं पठसि। - (बहुवचने) - ..............................

(ग) युवां गच्छथः। - (एकवचने) - ..............................

(घ) अस्माकं पुस्तकानि। - (एकवचने) - ..............................

(ङ) तव गृहम्। - (द्विवचने) - ..............................

© NCERT not to be republished





**3. कोष्ठकात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत-**

(क) ...................... पठामि। (वयम्/अहम्)

(ख) ...................... गच्छथ:। (युवाम्/यूयम्)

(ग) एतत् ...................... पुस्तकम्। (माम्/मम)

(घ) ...................... क्रीडनकानि। (युष्मान्/युष्माकम्)

(ङ) ...................... छात्रे स्व:। (वयम्/आवाम्)

**4. अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत-**

| | | |
|---|---|---|
| यूयम् | लेखं | पश्यामि |
| वयम् | शिक्षिकां | रचयाम: |
| युवाम् | दूरदर्शनं | कथयिष्यथ: |
| अहम् | कथां | पठिष्याव: |
| त्वम् | पुस्तकं | लेखिष्यसि |
| आवाम् | चित्राणि | नंस्यथ |


**5. उचितपदै: वाक्यनिर्माणं कुरुत-**

| | | | | | |
|---|---|---|---|---|---|
| मम | तव | आवयो: | युवयो: | अस्माकम् | युष्माकम् |

यथा- एषा **मम** पुस्तिका।

(क) एतत् .............................. पुस्तकम्।

© NCERT not to be republished






(ख) .......................... बुद्धिस्थिरा।

(ग) एषः .......................... देवालयः।

(घ) एषा .......................... शिक्षिका।

(ङ) संस्कृतम् .......................... भाषा।

(च) एतानि .......................... चित्राणि।

## 6. वाक्यानि रचयत-

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (क) | त्वं लेखं लेखिष्यसि। | ..........................। | ..........................। |
| (ख) | ..........................। | आवाम् वस्त्रे धारयिष्यावः। | ..........................। |
| (ग) | अहं पुस्तकं पठिष्यामि। | ..........................। | ..........................। |
| (घ) | ..........................। | ते फले खादिष्यथः। | ..........................। |
| (ङ) | मम गृहं सुन्दरम्। | ..........................। | ..........................। |
| (च) | ..........................। | ..........................। | यूयं गमिष्यथ। |

© NCERT not to be republished



7. एकवचनपदस्य बहुवचनपदं, बहुवचनपदस्य एकवचनपदं च लिखत-

| | | |
|---|---|---|
| यथा- | एषः | एते |
| | सः | ............... |
| | ताः | ............... |
| | त्वम् | ............... |
| | एताः | ............... |
| | तव | ............... |
| | अस्माकम् | ............... |
| | तानि | ............... |



© NCERT not to be republished